**विद्या भवन बालिका विद्यापीठ लखीसराय**

**वर्ग नवम् विषय संस्कृत शिक्षक श्यामउदय सिंह**

**ता:-२१/०५/२०२० (बोर्ड बेस्ड क्वेश्चन)**

श्लोक ७.यत्रापि कुत्रापि गता भवेयुर्हंसा महीमण्डलमण्डनाय ।

हानिस्तु तेषां सरोवराणां येषां मरालैः सह विप्रयोग:।।

(१) एकपदेन उत्तरत-

(i) हानि: केषाम् भवति ?

(ii) हंसा: किमर्थं गच्छेयु:?

(२) पूर्णवाक्येन उत्तरत-

(i) कीदृशानां सरोवराणां हानि: भवति?

(ii) हंसा: किम् मण्डनाय गच्छेयु:?

(३) निर्देशानुसारम् उत्तरत –

(i) 'मराला:' इति पदस्य पर्यायपदं पद्यांशे किम् प्रयुक्तम् ?

(ii) 'हंसा:' इति कर्तृपदस्य क्रियापदं किम् ?

(iii) ‘संयोग:'इति पदस्य क: विपर्यय: अत्र आगत: ?

(iv) 'तेषां हि सरोवराणाम् ' अत्र विशेषणपदं किम् अस्ति ?

श्लोक ८.गुणा गुणज्ञेषु गुणा भवन्ति ,ते निर्गुणं प्राप्य भवन्ति दोषा:।

आस्वाद्यतोया: प्रवहन्ति नद्य: ,समुद्रमासाद्य भवन्त्यपेया: ।।

(१) एकपदेन उत्तरत-

(i) निर्गुणं प्राप्य गुणा: किं भवन्ति ?

(ii) गुणा: केषु गुणा: भवन्ति

(२) पूर्णवाक्येन उत्तरत-

(i) कीदृश्य: नद्य: प्रवहन्ति ?न

(ii) समुद्रमासाद्य कीदृश्य: भवन्ति ?

(३) भाषिककार्यम्

(i) ‘नद्य:' इति कर्तृपदस्य क्रियापदं किम्?

(ii) ‘आसाद्य'इति पर्यायपदं पद्यांशे किम् अस्ति?

(iii) 'दोषा:' इति पदस्य क: विपर्यय:अत्र प्रयुक्त:?

(iv) ‘अपेया:' इति विशेषणपदस्य विशेष्यपदम् अत्र किम् ?